

# दशरूपकप्रभा




लेखकः

डॉ. सुरेशकुमार टी. व्यासः



श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्-गुजरातम्

Shree Somnath Sanskrit University-Veraval-Gujarat

2013


Scanned with CamScanner

**प्रकाशकः** -

**डॉ. दशरथः जादवः**

कुलसचिवः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

युनिवर्सिटी रोड, वेरावलम् - ३६२ २६५

जुनागढजनपदम् (गुजरात)

**प्रथमं संस्करणम्**

फरवरी, २०१३

**प्रतयः**

३००

ISBN

978-93-83097-09-8

**मूल्यम्**

रु. ५०/-

**मुद्रकः**

एच. के ओफसेट, वेरावलम्



Scanned with CamScanner

# ।। शुभाशंसनम् ।।

विद्यायाः प्रकाशनं बहुविधं भवति। कदाचित् अध्यापनेन, कदाचित् अध्ययनेन, कदाचित् प्रवचनेन च। परन्तु उपर्युक्ताः प्रकाशनमार्गाः अपेक्षितविद्याप्रकाशनं न कुर्वन्ति यावद्ग्रन्थप्रकाशनं विद्याप्रकाशनं जने–जने करोति। अत एवोक्तम् ''पुस्तकी भवति पण्डितः''। अर्थात् यस्य पार्श्वे पुस्तकानि बहूनि विविधानि च भवन्ति स पण्डितो भवति। श्रीसोमनाथसंस्कृतविश्वविद्यालयः एकत्र तु संस्कृतभाषायाः प्रचारप्रसारक्षेत्रे समर्पितकालो वर्तते तदाऽन्यत्र नूतनसाहित्यसर्जनां कारयितुं तस्याश्च प्रकाशनं कारयितुं दत्तावधानोऽस्ति। अस्मिन्नेव शुभे पुण्ये च सन्दर्भे **'उज्जयिनीनगरे'** आयोजिते **''संस्कृतसाहित्योत्सवे'** श्रीसोमनाथसंस्कृतविश्वविद्यालयः बहूनां ग्रन्थानां प्रकाशनं करोति। अध्यापकानां छात्राणां च कृते **काव्यगुणादर्शे दुशरूपकप्रभा** नामधेयः ग्रन्थोऽयं महते लाभाय भविष्यति। अस्य ग्रन्थस्य प्रसाराय अहं शुभाशंसनं प्रकटीकरोमि।

।। जयतु सोमनाथः जयतु संस्कृतम् ।।

*प्रो. वी. कुटुम्बशास्त्री*

कुलपतिः

Scanned with CamScanner

## ग्रन्थकर्तुः परिचयः

**परिचयः**–> दशरूपकस्य रचयिता श्रीधनञ्जयोऽस्ति। संस्कृतसाहित्ये प्रायः प्राचीनाः लेखकाः स्वपरिचये मौनं भजन्ते परमत्र श्रीधनञ्जयः अपवादरूपः यतो हि सः स्वयमेव ग्रन्थस्यान्तभागे निबद्धे श्लोके स्वपरिचयं ददाति। यथा –

**विष्णोः सुतेनापि धनञ्जयेन विद्वन्मनोरागनिबन्धहेतुः ।**
**आविष्कृतं मुञ्जमहीशगोष्ठी वैदग्ध्यभाजा दशरूपमेतत् ॥**

श्लोकेऽस्मिन्निरूपितं यत् श्रीधनञ्जयः मालवादेशस्य परमारवंशस्य नृपस्य मुञ्जस्य राजसभायां राजकविः आसीत्। अस्य च पितुर्नाम श्रीविष्णुरासीत्। मुञ्जराजा स्वयं वीरः कविश्च तस्मादनेकेषां विदुषां कवीनाञ्च आश्रयदाता । अस्याश्रये तिलकमञ्जरीकारः धनपालः नवसाहसाङ्कचम्पूकाव्यकारः पद्मगुप्तश्च आस्ताम्।

**समयः**

अनेकैः प्रमाणैः अस्य श्रीधनञ्जयस्य समयः दशमशताब्द्याः उत्तरार्धः इति सिद्धं भवति

तत्र प्रमाणानि यथा –

१ रुद्रटस्य काव्यालङ्कार एकः श्लोकः यथा –

**रसनाद् रसत्वमेतेषां मधुरादीनामिवोक्तमाचार्यैः ।**
**निर्वेदादिष्वपि तत्प्रकाशममस्तीति तेऽपि रसाः ॥**

अयं शान्तरसस्य विवेचने दशरूपके अवलोके स्वीकृतोऽस्ति। दशरूपकेऽपि

**निर्वेदादितराद् रूप्याद् अस्थायी स्वदते कथम् ।**
**वैरस्यायैव तत्पोषः तेनाष्टौ स्थायिनो मताः ॥**

अत्र च काव्यालङ्कारस्य सङ्केतः दृष्टिपथं समायाति। अपि च अवलोके ध्वन्यालोकस्य **"यत्रार्थः शब्दो वा"** इत्यादि तथा **"प्राध्तन्येऽन्यत्र वाक्यार्थे"** इत्यादि कारिकाद्वयम् उदाहृतमस्ति। आभ्यां च उदाहरणाभ्यां रुद्रटस्य समयः ८५० ई , आनन्दवर्धनाचार्यस्य च समयः ८६० ई तः ८९० ई यावत् निश्चितोऽस्ति अतः धनञ्जयः तत्परवर्ती दशमशताब्दीसंभव इति निश्चितं भवति।



Scanned with CamScanner